70OE9FC

# सङ्कलनात्मकं मूल्याङ्कनम् – II (2015-16)

## संस्कृतम् – सम्प्रेषणात्मकम्

## कक्षा – नवमी

**समय : होरात्रयम्** **पूर्णाङ्काः 90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

खण्डः (क) अपठित-अवबोधनम् – **10 अङ्काः**

खण्डः (ख) रचनात्मक-कार्यम् – **15 अङ्काः**

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् – **30 अङ्काः**

खण्डः (घ) पठित-अवबोधनम् – **35 अङ्काः**

(ii) सर्वे प्रश्नाः **अनिवार्याः।**

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंज्ञ्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क' अपठित-अवबोधनम् – ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।(2+2+4+2)** 10

वैज्ञानिकाः सञ्चारसाधनेषु प्रतिदिनं नवीनतमान् आविष्कारान् कुर्वन्ति येन सन्देशप्रेषणे अधिकतमा सुविधा स्यात्। चलभाषित्रयन्त्रम् (मोबाइल सेल फोन) तादृशम् एव लोकप्रियं यन्त्रम्। बालाः, वृद्धाः, युवकाः पुरुषाः, महिलाः, नागरिकाः, ग्रामीणाः वा, सर्वेषाम् एव एतत् कर्णभूषणं जातम्। यानानि आरूढाः, कार्यालयेषु कार्यं कुर्वन्तः, मार्गेषु चलन्तः, सभागारेषु प्रवचनं शृण्वन्तः जनाः अस्य ध्वनिं श्रुत्वा वार्तामग्नाः भवन्ति। अविवेकपूर्णः अस्य प्रयोगः कार्येषु व्यवधानं करोति। मार्गेषु दुर्घटनाः भवन्ति। सभागारेषु, कक्षासु, अन्यसभासु वा अव्यवस्था भवति। सत्यम् अस्ति यत् आविष्कारः कदापि हानिकरः न, परन्तु तस्य दुष्प्रयोगेण जीवनस्य शान्तिः नश्यति। वस्तुतः वयं यन्त्रस्य अधीनाः न स्याम अपितु यन्त्रम् अस्माकम् अधीनं स्यात्। ते एव बुद्धिमन्तः ये विज्ञानस्य सदुपयोगं कुर्वन्ति।

**I. एकपदेन उत्तरत।**

(i) वयं कस्य अधीनाः न स्याम?

(ii) यन्त्रस्य कीदृशः प्रयोगः कार्ये व्यवधानं करोति?

**II. पूर्णवाक्येन उत्तरत।**

(i) कार्येषु यन्त्रस्य प्रयोगेण किं भवति?

(ii) जीवनस्य शान्तिः कथं नश्यति?

**III. निर्देशानुसारम् उत्तरत।**

(i) 'कुर्वन्ति' इति क्रियापदस्य कर्ता कः?

(अ) बालाः (ब) महिलाः

| | | | |
|---|---|---|---|
| | | (स) पुरुषा (द) वैज्ञानिका:<br>(ii) 'सदुपयोगं' इत्यस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?<br>(अ) दुष्प्रयोगं (ब) दुरुपयोगं<br>(स) लोकप्रियं (द) प्रेषणं<br>(iii) 'चलभाषित्रयन्त्रं तादृशम् एव लोकप्रियं यन्त्रम्' अत्र विशेषणपदं किम्?<br>(अ) यन्त्रम् (ब) प्रियं<br>(स) लोकप्रियं (द) एव<br>(iv) 'तस्य दुष्प्रयोगेण---' अत्र तस्य सर्वनामपदं कस्मै प्रयुक्तम्?<br>(अ) जनाय (ब) आविष्काराय<br>(स) मोबाइलाय (द) जीवनाय<br>**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** | |
| | | **खण्डः 'ख' रचनात्मक-कार्यम् - ( 15 अङ्काः )** | |
| 2 | | भवान् रोहितः। शुल्कक्षमापनार्थं प्रधानाचार्यं प्रति पत्रं लिखत।<br>(i) ..................<br>रामकृष्णपुरम् सै. 2<br>नव दिल्ली।<br>**विषय** – शुल्कक्षमापनार्थं निवेदनम्<br>(ii) .................. सविनयं निवेदनम् अस्ति (iii) .................. अहं भवतः विद्यालये नवमकक्षायाः छात्रः (iv) .................. । मम पिता एकः (v) ..................अस्ति। तस्य मासिकं वेतनं (vi) .................. मात्रमेव अस्ति। मम एकः भ्राता अष्टमकक्षायां (vii) .................. च पंचमकक्षायां पठति। अस्माकं कटुम्बस्य निर्वाहः अतीव काठिन्येन भवति। (viii) ..................कक्षायां प्रतिवर्षं प्रथमं स्थानं प्राप्नोमि। अतः, (ix) .................. प्रार्थये। आशासे अत्रभवान् मम एतां प्रार्थनां स्वीकृत्य अनुग्रहीष्यति।<br>(x) ..................<br>रोहितः<br>नवमकक्षास्थः<br>तिथिः ..................<br>**मञ्जूषा** : शुल्कक्षमापनार्थम्, अहं, भगिनी, श्रीमन्, प्रधानाचार्यमहोदयः, लिपिकः, यत्, अस्मि, सप्तसहस्ररूप्यकाणि, विनीतः शिष्यः। | 5 |
| 3 | | अधोदत्तं चित्रं दृष्ट्वा संस्कृतेन पञ्च वाक्यानि लिखत। (2x5=10) | 10 |



**मञ्जूषा**
नद्याः, गगने, खगाः, नदी, सूर्यः, वृक्षाः, उदयति, उपवनम्, उत्पतन्ति, नदी, विकसन्ति पुष्पाणि, पर्वताः, मेघाः, सुन्दरम्।

**अथवा**

**'पर्वतीयस्थलस्य वर्णनम्'** इति विषयम् अधिकृत्य संस्कृतेन पञ्च वाक्यानि लिखत।(2x5=10) 10
**मञ्जूषा**–सुन्दरम्, वृक्षाः, सुन्दराणि, गृहाणि, रम्याः, पर्वतीयस्थलम्, वृक्षाः, पक्षिणः, जनाः, भ्रमन्ति, आगच्छन्ति, पर्वताः, वन्यपशवः, परितः, लसन्ति।

## खण्डः 'ग' अनुप्रयुक्त व्याकरणम् – ( 30 अङ्काः )

4 **उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत।** 6

(i) रामः गृहम् ..................... तृणं स्पृशति।
(अ) गच्छत् (ब) गच्छन् (स) गच्छति (द) गच्छन्तौ

(ii) ..................... जीवनं परोपकाराय एव अस्ति।
(अ) भवताम् (ब) भवन्तः (स) भवान् (द) भवद्भ्यः

(iii) भोः बालकाः ..................... सर्वत्र पूजनीयाः।
(अ) विद्वांसः (ब) विद्वान् (स) विदुषः (द) विदुषाम्

(iv) भृत्याः ..................... सेवां कुर्वन्ति।
(अ) राज्ञः (ब) राज्ञा (स) राज्ञाम् (द) राजा

(v) हे सौम्य! स एव .....................।
(अ) आत्मन् (ब) आत्मा (स) आत्मानम् (द) आत्मनि

(vi) ..................... मनः तु मम अधीनम्।
(अ) भवान् (ब) भवता (स) भवतः (द) भवन्तम्

| | | |
|---|---|---|
| 5 | **उचितसंज़्यापदैः रिक्त स्थानानि पूरयत।**<br>(i) .................. छात्रौ स्वपाठं सम्यक् पठतः। (द्वि)<br>(ii) .................. बालकानाम् गृहाणि विद्यालयस्य समीपे एव सन्ति। (पञ्च)<br>(iii) .................. रुग्णाय फलानि यच्छ। (एक)<br>(iv) .................. वृक्षेषु अनेकाः चटकाः तिष्ठन्ति। (चतुर्)<br>(v) .................. बालिका शोभनं गायति। (एक)<br>(vi) अहम् प्रतिदिनं .................. फलानि खादामि। (त्रि) | 6 |
| 6 | **प्रदत्तविकल्पेभ्यः उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत।**<br>(i) विद्वांसः सर्वं सन्मार्गे .................... ।<br>(अ) नयतु (ब) नयताम्<br>(स) नयन्तु (द) नय<br>(ii) जनाः सर्वत्र .................... ।<br>(अ) मोदताम् (ब) मोदेताम्<br>(स) मोदन्ताम् (द) मोदस्व<br>(iii) अध्यापकः–हे अमित। यत्र सन्देहः तत्र .................... ।<br>(अ) पृच्छतम् (ब) पृच्छत<br>(स) पृच्छानि (द) पृच्छ<br>(iv) वयम् अपि एवं .................... ।<br>(अ) चिन्तयेत् (ब) चिन्तयेताम्<br>(स) चिन्तयेयुः (द) चिन्तयेम<br>(v) वयं कदाचित् न .................... ।<br>(अ) याचेय (ब) याचेवहि<br>(स) याचेरन् (द) याचेमहि<br>(vi) सर्वे एव सुखाय .................... ।<br>(अ) इच्छ (ब) इच्छन्तु<br>(स) इच्छतु (द) इच्छानि | 6 |
| 7 | **उचित-उपपदविभक्तीनां प्रयोगं रिक्तस्थानेषु कुरुत।**<br>(i) अयं पुस्तकालयः। अलम् ................ ।<br>(अ) कोलाहलम् (ब) कोलाहलेन<br>(स) कोलाहलः (द) कोलाहलात्<br>(ii) मम माता ................ प्रति अगच्छत्।<br>(अ) देवालयम् (ब) देवालये<br>(स) देवालयस्य (द) देवालयः | 6 |

(iii) ................ कदापि न विश्वसेत्।

(अ) दुष्टम् (ब) दुष्टेषु

(स) दुष्टः (द) दुष्टस्य

(iv) एतानि पुस्तकानि ................ अलम्।

(अ) सर्वेभ्यः (ब) सर्वे

(स) सर्वाणि (द) सर्वम्

(v) सः ................ प्रमाद्यति।

(अ) धर्मम् (ब) धर्मेण

(स) धर्माय (द) धर्मात्

(vi) ................ रविः श्रेष्ठः।

(अ) ग्रहाणाम् (ब) गृहेभ्यः

(स) ग्रहान् (द) ग्रहाः

8 **अधोलिखितेषु वाक्येषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।** 6

(i) छात्रैः लेखाः **<u>लिखिताः</u>**।

(अ) लिख् + क्त (ब) लिख् + शतृ

(स) लिख् + क्तवतु (द) लिख् + शानच्

(ii) वानराः फलानि ....................। (भक्ष् + क्तवतु)

(अ) भक्षितवन्तौ (ब) भक्षितवत्

(स) भक्षितवन्तः (द) भक्षितवान्

(iii) **<u>हसन्तौ</u>** शिष्यौ चित्रं पश्यतः।

(अ) हस् + क्तवतु (ब) हस् + शतृ

(स) हस् + शानच् (द) हस् + क्त

(iv) पाठं .................... कन्या अस्वपत्। (स्मृ + शतृ)

(अ) स्मरत् (ब) स्मरन्

(स) स्मरन्तौ (द) स्मरन्ती

(v) कष्टे .................... अपि अमितः प्रसन्नोऽस्ति। (वृत् + शानच्)

(अ) वर्तमाना (ब) वर्तमानम्

(स) वर्तमानः (द) वर्तमानानि

(vi) ते किमर्थं तत्र स्थितवन्तः?

(अ) स्था + क्त (ब) स्था + क्तवतु

(स) स्था + शतृ (द) स्था + शानच्

**खण्ड : 'घ' पठित-अवबोधनम् - 35 अङ्काः**

| | | |
|---|---|---|
| 9 | **अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानां उत्तराणि लिखत-(2+1+2)**<br>राज्ञः जनकस्य अनुमत्या अष्टावक्रः पण्डितैः सह शास्त्रार्थं कृत्वा तान् अजयत्। अष्टावक्रस्य आत्मज्ञानं शास्त्रपाण्डित्यं बुद्धिपाटवं संयमादिगुणजातं च निरीक्ष्य राजर्षिः जनकः प्रभावितः भूत्वा तस्मै निवेदितवान् "भगवन्! अहं भवद्दर्शनैः आत्मानं धन्यं मन्ये। इच्छामि भवद्भ्यः किञ्चिद् दातुम्।"<br>अष्टावक्रः प्रत्यवदत् ''यदि भवान् इच्छति, तदा यद् वस्तु भवदीयम् अस्ति, तत् मह्यम् अर्पय"।<br>I. एकपदेन उत्तरत।<br>(i) अष्टावक्रस्य दर्शनेन कः आत्मानं धन्यं मन्यते?<br>(ii) कस्य अनुमत्या अष्टावक्रः पण्डितैः सह शास्त्रार्थम् अकरोत्?<br>II. एकवाक्येन उत्तरत।<br>अष्टावक्रस्य किम् किम् गुणं निरीक्ष्य जनकः प्रभावितः अभवत्?<br>III. भाषिक-कार्यम्-<br>(i) 'इच्छति' इति क्रियापदस्य कर्तृपदं किम्?<br>(अ) भवान् (ब) भवदीयम्<br>(स) मह्यम् (द) अष्टावक्रः<br>(ii) 'राजर्षिः' इति पदस्य विशेष्यपदं लिखत।<br>(अ) निरीक्ष्य (ब) जनकः<br>(स) प्रभावितः (द) तस्मैः | 5 |
| 10 | **निम्नलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत :- (2+1+2)**<br>अहो! एषां वरं जन्म सर्वप्राण्युपजीवनम्।<br>धन्या महीरुहा येभ्यो निराशा यान्ति नार्थिनः ।।<br>I. एकपदेन उत्तरत।<br>(i) के धन्याः?<br>(ii) अर्थिन : केभ्यः निराशाः न यान्ति ?<br>II. पूर्णवाक्येन उत्तरत।<br>वृक्षाणां जन्म कथं वरम् अस्ति ?<br>III. भाषिककार्यम्-<br>(i) वृक्षाः पदस्य पर्यायपदम् अस्ति ?<br>(अ) निराशाः (ब) अर्थिनः<br>(स) महीरुहाः (द) उपजीवनम्<br>(ii) श्लोके 'एषाम्' पदं केभ्यः प्रयुक्तम् ?<br>(अ) महीरुहेभ्यः (ब) पत्रेभ्यः<br>(स) फलेभ्यः (द) बीजेभ्यः | 5 |
| 11 | **अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत -(2+1+2)** | 5 |

| | | | |
|---|---|---|---|
| | (धारानगर्यां भोजराजस्य राजसभा। सर्वे अमात्या: कर्मचारिण: च यस्थास्थानम् आसनानि अध्यासते।)<br>**( प्रविश्य )**<br>**द्वारपाल :** जयतु देव:। द्रविडदेशीय: लक्ष्मीधरनामा कश्चिद् विद्वान् देवस्य दर्शनार्थं द्वारदेशम् अध्यास्ते।<br>**भोज:** सादरं प्रवेशय।<br>**द्वारपाल:** यथा आदिशति देव:। (निष्क्रान्त:)<br>**लक्ष्मीधर:** (द्वारपालेन सह प्रविश्य), राजन्! अभिवादये भवन्तम्। दिनकरदीप्तिरिव भवत्कीर्ति: दिक्षु प्रसारम् आप्नोतु। वर्धन्तां विभवा: सौख्यानि च। लसन्तु सम्पद:, विलयं व्रजन्तु च विपद:। प्रतिष्ठां लभतां विद्वद्गण:। सततम् एधताम् विद्यासु कलासु च भवदनुराग:। श्रूयताम् –<br>I. एकपदेन उत्तरत:–<br>(i) द्वारपालेन सह क: प्रविशति ?<br>(ii) नृपस्य कीर्ति: कथं दिक्षु प्रसारम् आप्नोतु ?<br>II. पूर्णवाक्येन उत्तरत :-<br>के यथास्थानं आसनानि अध्यासते ?<br>III. भाषिककार्यम् :-<br>(i) 'सम्पद:' अस्य शब्दस्य विपर्यय: क: ?<br>(अ) लसन्तु (ब) विलयं (स) विपद: (द) विभवा:<br>(ii) 'निरन्तरम्' अस्य पदस्य कृते नाट्यांशे किं पदम् प्रयुक्तम् ?<br>(अ) प्रविश्य (ब) एधताम् (स) सततम् (द) विलयं | |
| 12 | **अधोलिखितश्लोकयो: अन्वयं कुरुत –( ½ x 10 =5)**<br>**( क )** वेशभूषाशनोपासनापद्धति –<br>क्रीडनामोदसंस्कारवृत्त्यादिषु<br>यद्धि भिन्नं सदप्यस्त्यभिन्नं सदा<br>भूतले भाति मेऽनारतं भारतम्।।<br><br>**अन्वय:** – यत् हि वेशभूषाशनोपासनापद्धति – (i)............– आमोदसंस्कारवृत्ति (ii)............. भिन्नम् सत् (iii)............ सदा **(iv)**............ अस्ति तत् मे (v)............ भूतले भाति।<br>**( ख )** अर्थकामान्वितं धर्ममोक्षान्वितम्<br>भक्तिभावान्वितं ज्ञानकर्मान्वितम्।<br>नैकमार्गै: प्रभुं चैकमाराधयद्<br>भूतले भाति मेऽनारतं भारतम्।।<br>**अन्वय:** – अर्थकामान्वितम् (i)............ भक्तिभावान्वितम् ज्ञानकर्मान्वितम् (ii)............. एकम् (iii)............ च **(iv)**............ मे भारतं भूतले (v)............ भाति। | 5 |
| 13 | **रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** | 5 |

(i) तरवे नमोऽस्तु।

(ii) वृक्षाः अन्यस्य सुखस्य हेतोः सर्वम् अर्पयन्ति।

(iii) तरवः छायया जनानां अतितापम् दलयन्ति।

(iv) महीरूहेभ्यः अर्थिनः निराशा न यान्ति।

(v) हन्त! सम्प्रति जनानां अतितापं हरति।

**14 अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत।** (½ x 10 = 5) — 5

(1) माता अष्टावक्रं पितुः विषये अवदत्।

(2) अष्टावक्रः कथयति – ''एते मे देहं दृष्ट्वा हसन्ति, अहम् एतेषां मूर्खतां दृष्ट्वा हसामि।''

(3) राजर्षि जनकः तं स्वगुरुम् अमन्यत।

(4) अष्टावक्रः पण्डितानां चेष्टितं दृष्ट्वा उच्चैः अहसत्।

(5) मात्रा अनुमतः अष्टावक्रः राजसभां गतः।

(6) जनकः अपृच्छत् – भो अष्टावक्र! किमर्थम् हससि?

(7) हे राजन्! किम् वक्रे देहे आत्मा अपि वक्रः भवति?

(8) अष्टावक्रस्य शास्त्रपांडित्येन सर्वे प्रभाविताः जाताः।

(9) पण्डिताः तं वक्रदेहं बालं दृष्ट्वा हसितुम् प्रारभन्त।

(10) जनकः स्वमनः अष्टावक्राय यच्छति।

**15 रेखाङ्किकतशब्दानाम् अर्थान् विकल्पेभ्यः चित्वा लिखत।** — 5

(i) मोदतां राजतां पावनं भारतं।

(अ) राज्यं (ब) सुशोभतां (स) राजानम्

(ii) भारतं वर्तते मे परं सम्बलं।

(अ) सर्वेभ्यः (ब) श्रुतं (स) आश्रयः

(iii) भारतायार्पित मेऽखिलम् चेष्टितम्।

(अ) चतुराः (ब) चेष्टाः (स) चक्षुः

(iv) भारतं वर्तते मे परं सम्बलं।

(अ) आसीत् (ब) अस्ति (स) भविष्यति

(v) भारतं नित्यमेव स्मरामि प्रियम्।

(अ) सदैव (ब) कदाचित् (स) अधुना

-o0o0o0o-